॥ श्री ॥

नारदीयम्

# चत्वारिंशच्छतरागनिरूपणम् ।

प्रकाशक

भालचन्द्र सीताराम सुकथनकर, एम्. ए.

सन १९१४.

( सर्व अधिकार स्वाधीन आहेत )

॥ श्रीः ॥

नारदीयम्

# चत्वारिंशच्छतरागनिरूपणम् ।

एतत्पुस्तकं

पुण्यनगरस्थपंडितदत्तात्रयकेशवजोशीत्यभिधेन
परिशोधितम् ।

तच्च

## भालचंद्रशर्मणा

आर्यभूषणाख्यमुद्रणालये मुद्राक्षरैरंकयित्वा
प्राकाश्यं नीतम् ।

( शके १८३६ सन १९१४ )

( सर्वेऽधिकाराः स्वायत्तीकृताः )

Printed at the Arya-Bhushan Press, Poona by N. A. Dravid,
and
Published by Bhalchandra Sitaram Sukthanker, M. A.,
2 Malabar Hill, Bombay.

॥ श्रीः ॥

नारदीयम्

# चत्वारिंशच्छतरागनिरूपणम् ।

श्रीगणेशायनमः ।

श्रीमद्ब्रह्मपरं सदाशिवमयं चिद्रूपमाद्यं समं ।
मायातीतममेयमक्षरमुदाराकारमव्याहतम् ॥
तेजः पद्मभवाद्यगोचरमजं वेद्यं त्रयीमौलिभि- ।
ध्यायेत्संततमंतरंगसरणौ नादात्मकं विश्रुतम् ॥ १ ॥
समाहृत्यान्यसंगीतशास्त्राणि विविधानि च ।
सम्यग्विचार्य संक्षेपात्कुरुते नारदो मुनिः ॥ २ ॥
संगीतशास्त्रकर्तारः प्रथमः पार्वतीपतिः ।
परमेष्ठी च भरतः काश्यपः शक्तियाष्टिकौ ॥ ३ ॥
शार्दूलको मतंगश्च दंतिलः कोहलस्तथा ।
कंबलाश्वतरौ वायुर्विश्वावसुविशाखिलौ ॥ ४ ॥
रंभा च तुंबरुश्चा × मांजनेयश्च रावणः ।
मातृगुप्तो नंदिकेश इंद्रश्च क्षेत्रपालकः ॥ ५ ॥
उग्रसेनोऽर्जुनश्चैव संत्यन्ये बहवो धनाः ।
तेषां मार्गान् समालोच्य संग्रहः क्रियते मया ॥ ६ ॥
चैतन्यं सर्वभूतानां विवृत्तं जगदात्मना ।
नादब्रह्मामृतानंदमाद्वितीयमुपास्महे ॥ ७ ॥
गीतं वाद्यं तथा नृत्यं त्रयं संगीतमुच्यते ।
मार्गो देशीति तद्द्वेधा तत्र मार्गः स उच्यते ॥ ८ ॥

यो मार्गितो विरिंचाद्यैः प्रयुक्तो भरतादिभिः ।
देवस्य पुरतः शंभोर्नियतोऽभ्युदयप्रदः ॥ ९ ॥
देशे देशे जनानां यद्रुच्या हृदयरंजनम् ।
गीतं च वादनं नृत्तं तद्देशीत्यभिधीयते ॥ १० ॥
नृत्यं वाद्यानुगं प्रोक्तं वाद्यं गीतानुवर्ति च ।
अतो गीतं प्रधानत्वादत्रादावभिधीयते ॥ ११ ॥
सामवेदादिदं गीतं संजग्राह पितामहः ।
गीतेन प्रीयते देवः सर्वज्ञः पार्वतीपतिः ॥ १२ ॥
गोपीपतिरनंतोऽपि वंशध्वनिवशं गतः ।
सामगीतरतो ब्रह्मा वीणासक्ता सरस्वती ॥ १३ ॥
किमन्ये यक्षगंधर्वदेवदानवमानवाः ।
धर्मार्थकाममोक्षाणामिदमेव हि साधनम् ॥ १४ ॥
आत्मा विवक्षमाणोऽयं मनः प्रेरयते मनः ।
देहस्थं वह्निमाहंति स प्रेरयति मारुतम् ॥ १५ ॥
ब्रह्मग्रंथिस्थितं चाथ क्रमादूर्ध्वपथं चरन् ।
नादः सूक्ष्मोऽतिसूक्ष्मश्च पुष्टोऽपुष्टश्च कृत्रिमः ॥ १६ ॥

अथ स्वरलक्षणम् ।

कंठमध्ये हृदो मध्ये मध्यमंद्रौ प्रकीर्तितौ ।
तारस्तु मूर्ध्नि विज्ञेय इत्युक्तं पूर्वसूरिभिः ॥ १७ ॥
तस्य द्वाविंशतिर्भेदाः श्रवणाच्छ्रुतयो मताः ।
श्रुतिभ्यः स्युः स्वराः षड्जर्षभगांधारमध्यमाः ॥ १८ ॥
पंचमो धैवतश्चाथ निषाद इति सप्तमः ।
एते सप्तस्वरा ज्ञेयास्तंत्रीकंठोत्थितास्तदा ॥ १९ ॥
षड्जः ॥ ऋषभः ॥ गांधारः ॥ मध्यमः ॥ पंचमः ॥ धैवतः ॥
निषादः ॥ एते सप्तस्वरा गुरुमुखेन ज्ञेयाः ॥
एकश्रुतिर्द्विश्रुतिश्च त्रिश्रुतिश्च चतुःश्रुतिः ।
एकश्रुतिर्द्विश्रुतिश्च त्रिश्रुतिश्चेत्यनुक्रमात् ॥ २० ॥



अथ ग्रामौ ।

षड्जग्रामः पंचमश्च चतुर्थश्रुतिसंस्थितः ।
स स्वोपांत्यश्रुतिसंस्थो मध्यमग्राम इष्यते ॥ २१ ॥

अथ मूर्छनालक्षणम् ।

क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम् ।
मूर्छनेत्युच्यते ग्रामद्वये ताः सप्त सप्त च ॥ २२ ॥
षड्जे उत्तरमंद्रादौ रजनी चोत्तरायता ।
शुद्धषड्जा मत्सरीकृताश्वक्रान्ताभिरुद्गता ॥ २३ ॥
मध्यमे स्यात्तु सौवीरी हारिणा च ततः परम् ।
स्यात्कलोपनता शुद्धमध्या मार्गी च पौरवी ॥ २४ ॥
हृष्यकेत्यथ सप्ता च लक्षणं प्रतिपद्यते ।
चतुर्धा ताः पृथक् शुद्धाः काकलीकलिता मताः ॥ २५ ॥
सांतरास्तद्द्वयोपेताः षट्पंचाशत्प्रकीर्तिताः
तानाः स्युर्मूर्छनाः शुद्धाः षाडवौडुवितीकृताः ॥ २६ ॥
षड्जगाः सप्त हीनाश्चेत्क्रमात्सरिपसप्तमैः ।
तदाऽष्टाविंशतिस्ताना मध्यमे सरिगोज्झिताः ॥ २७ ॥
सप्त क्रमाद्यदा तानाः स्युस्तदा त्वेकविंशतिः ।
मूर्छनालक्षणानि स्युः ज्ञातव्यानि प्रयत्नतः ॥ २८ ॥

अथ सप्तस्वरज्ञानम् ।

निषादर्षभगांधारषड्जमध्यमधैवताः ।
पंचमश्चेत्यमी सप्त तंत्रीकंठोत्थिताः स्वराः ॥ २९ ॥
शिखी चातो ह्यजः क्रौंचः पिकदर्दुरकुंजराः ।
सप्तस्वरसमालापा इति रागविदो विदुः ॥ ३० ॥
षड्जं मयूरो वदति ऋषभं चातको वदेत् ।
अजो वदति गांधारं क्रौंचः क्वणति मध्यमम् ॥ ३१ ॥

( निषादं बृंहते नागो धैवतं दर्दुरो वदेत् ) ।
ऋतौ वसंतसमये पिको वदति पंचमम् ॥ ३२ ॥

इति नारदीये सप्तस्वरज्ञानम् ।

अथ सप्तस्वरनामाद्याक्षरोच्चारणेन स्वरमंडलज्ञानम् ।

स रि ग म प ध नि स । वैपरीत्यं । नि ध प म ग रि स॥

अनुलोमविलोमपठनेन तंतुज्ञानम् । अथ मुखोच्चारणेन स्वरज्ञानम् ॥

नासाकंठउरस्तालुजिव्हादन्ताः परिस्फुटम् ।
षड्भिः संजायते यस्मात् षड्ज इत्यभिधीयते ॥ इति षड्जः ॥
वायुः समुच्छ्रितो नाभेः कंठतालुसमाश्रितः ।
जायते ऋषभश्चैव ऋषभोऽयमतंद्रितः ॥ इति ऋषभः ॥
नाभेः समुच्छ्रितो वायुः कंठतालुसमाश्रितः ।
गांधारस्यापि हेतुत्वात्स्वयं गांधार उच्यते ॥ इति गांधारः॥
नाभिहृत्कंठदेशे तु तस्मान्मध्यम उच्यते ॥ इति मध्यमः॥
नाभिहृत्कंठताल्वोष्ठपंचकात् पंचमो भवेत् ॥ इति पंचमः ॥
नाभिहृदयसंभूतो धैवतः परिकीर्तितः ॥ इति धैवतः ॥
नाभिहृत्कंठताल्वोष्ठजिव्हादंतनिषादभित् ॥ इति निषादः॥

अथ गायनलक्षणम् ।

काकस्वरं वक्रमुखं निरोष्ठ्यं सानुनासिकम् ।
अप्रबंधं वितालं च कनिष्ठं गायनं स्मृतम् ॥
निबद्धमनिबद्धं तद्गीतं तु द्विविधं स्मृतम् ।
आलप्तिरनिबद्धं स्यान्निबद्धं पदसंयुतम् ॥
आलापा द्विविधाः प्रोक्ताः साक्षराश्च निरक्षराः ।
आलप्तिः पंचधा ज्ञेया गीतरागप्रसूचिका ॥
रसिको भावुकश्चैव ह्यनुकारोऽथ रंजकः ।
चत्वारः कथिता ह्येते शिक्षाकारस्तु पंचमः ॥
यथा पुरुषनारीणां लक्षणाभरणं तथा ।
तथा गीतं विनिश्चित्य ज्ञातव्यं सुप्रयत्नतः ॥



उद्ग्राहे नगराश्चैव अन्तरे शिथिलास्तथा ।
आभोगे हटकाश्चैव नववर्णान् विवर्जयेत् ॥
नकारो नष्टसर्वस्वं घकारो घात एव च ।
हकारो हरते लक्ष्मीं त्रयो गीतस्य वैरिणः ॥
धातुमातुस्वरतालगणवर्णषडुच्यते ।
एतानि च षडंगानि ज्ञातव्यानि सुगीतके ॥
स्वरसारः स्मृतः कर्णौ द्विधालप्तिश्च लोचने ।
रागक्रियांगभाषांगशारीरं प्रोच्यते बुधैः ॥
पदे पदस्तु विज्ञेयो हस्तौ रोहावरोहणे ।
निबद्धमनिबद्धं च घ्राणं च वदनं स्मृतम् ॥

× × ×

धातुहीनं पादभंगं कुशब्दं गुणनिर्वृतम् ।
द्विवर्णं मिश्ररागं च ह्यप्रबद्धं च मातुभिः ॥

× × ×

चिरं सविकलं भिन्नं गीतदोषाश्चतुर्दश ॥
अधमो धातुकारश्च मातुकारश्च मध्यमः ।
धातुमातुसमायुक्त उत्तमः परिकीर्तितः ॥

इति गायनलक्षणानि ॥

अथ गमकाः ।

स्फुरितः कंपितो लीनस्तिरिपांदोलितौ तथा ।
आहतश्च त्रिभिन्नश्च कुरुलप्लावितौ तथा ॥
हुंफितो नामितो मिश्रो वलितोल्लासितौ तथा ।
मुद्रितश्चेति भांत्येते गमका दश पंच च ॥

इति नारदीये गमकाः ॥

अथ गणप्रकरणम् ।

मगणो यगणश्चैव नगणो रगणस्तथा ।
सगणो जगणश्चैव तगणो भगणोऽष्टमः ॥

सविसर्गः सव्यंजनो दीर्घो युक्तपरो गुरुः ।
एतस्य वैपरीत्येन लघुर्ज्ञेयो विचक्षणैः ॥
सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः ।
वा पदांते त्वसौ वक्रो ज्ञेयोऽन्यो मात्रिको लघुः ॥
मो भूमिस्त्रिगुरुः श्रियं दिशतु वो वृद्धिं जलं चादिलो ।
रोऽग्निर्मध्यलघुर्विनाशमनिलो देशाटनं सो गतः ॥
तो व्योमांतलघुर्धनापहरणं जोऽर्को रुजं मध्यगो ।
भश्चंद्रो यश उज्वलं मुखगुरुर्नः शंभुरायुस्त्रिलः ॥
सोमो भौमो बुधो जीवः शुक्रः सौरी रविस्तमः ।
क्रमादकचटानां तपयशानां ग्रहाः स्मृताः ॥
अयसता गौरवर्णाः कृष्णाः कचटपाः स्मृताः ।
मिश्रिताः श्यामवर्णाश्च रक्ताः सानुस्वरास्तथा ॥
तच्छब्दे कथितं विश्वं ब्रह्म तन्न भवेत् तथा ।
तस्मात्तेनेतिशब्दोऽयं कथ्यते गीतकोविदैः ॥
अकारो वासुदेवः स्यात् तस्मादादौ विचिंतयेत् ।
एकारः शक्तिरेव स्याद्गायनादौ प्रकीर्तितः ॥
इकारः सर्ववर्णानां माता लक्ष्मीः प्रकीर्तिता ।
इति स्वयं स्मरेद्रागान् शुभं भवति नान्यथा ॥

इति नारदीये गणप्रकरणम् ॥

अथ रागवंशावली लिख्यते ।

श्रीरागश्च वसंतश्च पंचमो भैरवस्तथा ।
कौशिको मेघरागश्च नटनारायणस्तथा ॥
हिंदोलो दीपकश्चैव हंसकश्च यथाक्रमम् ।
दशैते पुरुषा रागा नारदेन समाहिताः ॥

१ अथ श्रीरागः । ध्यानम् ।

श्रीरागः स च विख्यातः सत्रयेण विभूषितः ।
पूर्णः सर्वगुणोपेतो मूर्छना प्रथमा मता ॥



अष्टादशाब्दः स्मरचारुमूर्ति- ।
धीरो लसत्पल्लवकर्णपूरः ॥
षड्जादिसेव्योऽरुणवस्त्रधारी ।
श्रीराग एष क्षितिपालमूर्तिः ॥

श्रीरागस्य स्त्रियः पंच गौडी कोलाहली तथा ।
आन्धाली द्राविडी मालूकौशिकीति प्रकीर्तिताः ॥

गौडीध्यानम् ।

निवेशयंती श्रवणेऽवतंस—
माम्रांकुरं कोकिलनादरम्या ।
श्यामा मधुस्यंदितसूक्ष्मनादा
गौडीयमुक्ता किल कोहलेन ॥ १ ॥

कोलाहलीध्यानम् ।

सुचंचला चंचलनेत्रवक्त्रा
पीनस्तनी गौरशरीरकांतिः ॥
तांबूलवीटीं दधती कराब्जे
कोलाहली नीलदुकूलराजिता ॥ २ ॥

आंधालिकाध्यानम् ।

आंधालिका प्रौढवपुः सुनेत्रा
पीयूषपात्रा कमनीयरूपा ।
दीर्घस्तनी कुंकुमरागशोणा
वासंतिका पुष्पकरा शुभांगी ॥ ३ ॥

द्राविडीध्यानम् ।

कर्णभूषणवतंसविलंबिनी
कोमला मधुरसुंदरभाषिणी ।
द्राविडी कनककांतघनस्तनी
कंचुकीरहितपीननितंबिनी ॥ ४ ॥

मालकौशिकाध्यानम् ।

स्मेरानना पीतवर्णा दृढपीनघनस्तनी ।
विमला पुंडरीकास्या राजते मालकौशिका ॥ ५ ॥

अथ श्रीरागस्य कुमारलक्षणानि ।

शुद्धगौडश्चकर्नाटो मालवः पूर्विकः क्रमात् ।
एते चत्वारः श्रीरागकुमाराः परिकीर्तिताः ॥
सर्वालंकारसंयुक्तो गौरः शुक्लांबरप्रियः ।
सर्पवाहः खड्गपाणिः शुद्धगौडो विराजते॥१॥शुद्धगौडः॥
लोहितांबरधारी च श्वेतमाहिषवाहनः ।
नारिकेरफलासक्तो युक्तः कर्नाटकः स्मृतः ॥ २ ॥ कर्नाटः ॥
रक्तनेत्रो महाकायो धनुर्बाणयुतः करः ।
श्यामः सुरंगवासोऽपि मालवः सोऽयमेधते॥३॥ मालवः ॥
श्वेतांबरो गजारूढो धनुर्विद्यातिकौशलः ।
सुगात्रो भिन्नवर्णः स्यात्स प्रोक्तः पूर्विकस्तथा॥४॥ पूर्विकः॥

तेषां स्त्रियः ।

वराटी बौलिका मध्यमादिरारभिरेव च ।
श्रीरागस्य स्नुषा एता नारदेन प्रकीर्तिताः ॥

वराटीध्यानम् ।

विनोदयंती दयितं सुकेशी
सुकंकणा चामरचालनेन ।
कर्णे दधाना सुरवृक्षपुष्पं
वरांगनेयं कथिता वराटी ॥ १ ॥

बौलिकाध्यानम् ।

मयूरपिच्छाकलिता मधुराहारवल्लभा ।
कालिका कमनीयांगी बौलिका भाति बंधुरा ॥ २ ॥



मध्यमादिध्यानम् ।

पत्या सहासं परिरभ्य कामं
सुचुंबितास्या कमलायताक्षी ।
स्वर्णच्छविः कुंकुमलिप्तदेहा
सा मध्यमादिः कथिता मुनींद्रैः ॥ ३ ॥

आरभीध्यानम् ।

नायकेन सदासक्ता नवमालिकयावृता ।
मद्यपानरता मंजुभाषिण्यारभिरेधते ॥ ४ ॥

२ अथ वसंतरागः । ध्यानम् ।

श्यामः सुवेशः सुकुसुंभवासाः
पलाशपुष्पाभरणानि यस्य ।
सानंदवक्त्रो धृतचापबाणो
गजाधिवासः कथितो वसंतः ॥

स्त्रियः ।

नीलांबरी धनाश्रीश्च रामक्रीः पटमंजरी ।
गौडक्रीरिति पंचैता वसंतस्य वरांगनाः ॥

नीलांबरीध्यानम् ।

हालापानसमासक्ता हरिणाक्षी सिताकृतिः ।
पत्युः परिरंभरता भाति नीलांबरी मता ॥ १ ॥

धनाश्रीध्यानम् ।

दूर्वादलश्यामतनुर्मनोज्ञा
कांतं लिखंती विरहेण दूना ।
शेते कपोले नयनोत्थबिंदु–
निस्यंदनिर्धौतकुचा धनाश्रीः ॥ २ ॥

रामक्रीध्यानम् ।

यक्षिणी पद्मवदना यक्षकिन्नरदुर्लभा ।
वीणाहस्ता पर्वतस्था रामक्रीरुच्यते बुधैः ॥ ३ ॥

पटमंजरीध्यानम् ।

शुभ्रांगा गौरवर्णा च शुभ्रपुष्पावतंसिनी ।
दध्योदनकरा शांता राजते पटमंजरी ॥ ४ ॥

गौडक्रीध्यानम् ।

शोकाभिभूतनयनारुणदीनदृष्टि-
र्नम्रानना धरणिधूसरगात्रयष्टिः ।
आमुक्तचारुकबरी प्रियदूरवर्ती
गौडक्रिया विजयते कृशरूपवेषा ॥ ५ ॥

अथ वसंतकुमाराः ।

सामः सोमो रीतिगौलः शंकराभरणस्तथा ।
वसंतस्य कुमाराः स्युर्नारदेन समीरिताः ॥
पारिजातप्रसूनाढ्यपार्वतीनाथपूजकः ।
श्यामाकृतिर्बुधाराध्यः सामरागः स राजते ॥१॥ सामः ॥
सुदृश्यः सुंदराकारः कलवाङ्मधुरस्वरः ।
शुभ्रांगः शुभ्रचेलाढ्यः सोमरागः प्रकीर्तितः ॥२॥सोमः॥
सुवर्णवर्णः सुरवृक्षपुष्प-
दामाभिरामो धननायकाप्तः ॥
विनीतिमान् विश्रुतकीर्तिशाली
प्रकीर्तितोऽयं भुवि रीतिगौलः ॥ ३ ॥ रीतिगौलः ॥
त्रिशूलस्तोमरो हस्ते शुभ्रो वृषभवाहनः ।
हृदि जातो वसंतस्य शंकराभरणः स्मृतः ॥४॥ शंकराभरणः ॥



वसंतस्नुषावर्णनम् ।

कल्याणी दुःखवैराटी सावेरी च तरंगिणी ।
स्नुषा एता वसंतस्य कीर्तिता रणभोजिना ॥
शुभवाक्चंद्रवदना पुलकांकितसुस्तनी ।
नीलोत्पलकरा श्यामा कल्याणी मृगवाहिनी ॥१॥कल्याणी॥
दुर्मुखी हास्यरहिता कृशा ह्यचपला मला ।
अल्पस्तनी म्लानमुखी दुःखवैराटिका स्मृता ॥२॥दुःखवैराटी
सावेरी केशिनी मुग्धा दर्पणाननपश्यती ।
पयोधराक्रांतमाला लीलामानसमोहना ॥ ३ ॥ सावेरी ॥
चंचला चतुरा मध्या विचित्रांबरभूषणा ।
उडुपस्था पृथुकुचा सैव प्रोक्ता तरंगिणी ॥ ४ ॥ तरंगिणी ॥

३. अथ पंचमः । ध्यानम् ।

गौरः सुनेत्रो धृतचापबाण-
स्तुरंगवाहः सुचरित्रलीलः ॥
लोहानलास्त्रो वनसंस्थितोऽपि
स पंचमो यः शुभदः सुलीलः ॥

अथ पंचमस्त्रियः ।

त्रिवली वल्लकी खंबावती च ककुभाऽऽहरी ।
प्रियाः पंचमरागस्य पंचैता मुनिना स्मृताः ॥
त्रिवली ललिता श्यामा निम्ननाभिस्तनूदरी ।
त्रिभंगी भावगंभीरा शुकहस्ता पृथुस्तनी ॥ १ ॥ त्रिवली ॥
मयूरवाहना नीला नीलोत्पलकरांबुजा ।
चतुर्भुजा त्रिनयना वल्लकी स्तनपीवरा ॥ २ ॥ वल्लकी ॥
राजस्त्रीवच्छुभांगी स्याद्विचित्रांबरधारिणी ।
खंबावती फणिकरा राजते पंचमप्रिया ॥ ३ ॥ खंबावती ॥

आताम्रनयना गौरा पृथुलस्तनमंडला ।
तांबूलकरपात्रा स्यात्ककुभा रक्तदंतिका ॥ ४ ॥ ककुभा ॥
नागकन्यातितन्वंगी दुग्धपानमदोत्कटा ।
सुकुंडला नागवाहा आहरी कठिनस्तनी ॥ ५ ॥ आहरी ॥

अथ पंचमपुत्राः ।

बलहंसश्च गांधारो देवहिंदोलपावकौ ।
पंचमस्य कुमाराः स्युश्चत्वारः प्रथिताव्हयाः ॥
बलहंसो बाललीलो लावण्यामृतसागरः ।
सुवेणुहस्तः क्रीडंश्च गंभीरो बालनिस्वनः ॥ १ ॥ बलहंसः ॥
सदागीतरतो धीमान् रुद्रवीणातिकौशलः ।
कोमलांगो ऱ्हस्वकायो गांधारः परिचक्ष्यते ॥ २ ॥ गांधारः ॥
देवहिंदोलकः श्यामोऽश्ववाहो वनजप्रियः ।
रक्तवासाः कृताभ्यासः करे परशुरंकुशः ॥ ३ ॥ देवहिंदोलः ॥
अग्निवर्णो धूम्रशिखी तप्तदेहोऽतिसुंदरः ।
शक्तिहस्तो मेषवाहः पावकः कथितः पुनः ॥ ४ ॥ पावकः ॥

पंचमस्नुषावर्णनम् ।

नारायणी च भूपाली मारुः स्यान्नवरोचिका ।
स्नुषाः पंचमरागस्य चतस्रः परिभाषिताः ॥
तुलसीमंजरीमाला मेघश्यामा कुरंगदृक् ।
शंखचक्रगदांभोजपाणिर्नारायणी स्मृता ॥१॥ नारायणी ॥
भूपाली शुद्धसत्पद्मा क्षीरोदवसना घना ।
प्रातः काले सदा सेव्या रागज्ञानविशारदैः ॥२॥ भूपाली ॥
मारुः श्रीमत्प्रिया दीना कृपालुश्च कृशोदरी ।
विवेकनिरता शांता सभया करुणानना ॥ ३ ॥ मारुः ॥
नवरोचिर्महारम्या नवकांचनभूषणा ।
तांबूलपूर्णवदना बिंब्याभ्रस्तनमंडिता ॥ ४ ॥ नवरोचिका ॥



४. अथ भैरवः । ध्यानम् ।

भस्मांगलिप्तावयवः सुगात्रो
भालस्थले शोभितशीतरश्मिः ।
त्रिशूलहस्तो वृषभाधिरूढः
स भैरवो यः कथितो मुनींद्रैः ॥

अथ भैरवस्त्रियः ।

वेलावली भैरवी च गुर्जरी ललिता तथा ।
कर्नाटी भैरवस्यैता भार्याः पंच विराजिताः ॥

संकेतदीक्षां दयिते च दत्वा
वितन्वती भूषणमंगकेषु ॥
मुहुः स्मरन्ती स्मरमिष्टदेवं
वेलावली नीलसरोजकांतिः ॥ १ ॥ वेलावली ॥

स्फटिकरचितपीठे रम्यकैलासशृंगे ।
विकचकमलपत्रैरर्चयन्ती महेशं ॥
करधृतघनवाद्या पीतवर्णायताक्षी ।
सुरमुनिगदितेयं भैरवी भैरवस्त्रीः ॥२॥ भैरवी ॥

रक्तांबरा गुर्जरिका शुभांगी
रक्तारविंदं सुकरे दधाना ॥
रक्तद्विजा रक्तनखौष्ठपादा
श्रीभैरवस्त्रीर्द्विभुजा शुभा स्यात् ॥ ३ ॥ गुर्जरी ॥

चामीकराभा ललिता सुमुग्धा
वीणाधरा कोकिलपाणिपद्मा ॥
कल्पद्रुमाधःस्थलसंस्थितापि
पयोधरामंडितकोटिकामा ॥ ४ ॥ ललिता ॥

कर्नाटिका भोगविलासलालसा
दुकूलवासा सुदती सुनासिका ॥
वृत्तस्तनी मुग्धविभूषितांगी
पुन्नागपुष्पाभरणावतंसिनी ॥५॥ कर्नाटिका ॥

अथ भैरवकुमाराः ।

पंचवक्त्रः सुकल्हारो ललितश्चंद्रशेखरः ।
भैरवस्य सुता एते चत्वारः परिकीर्तिताः ॥
पंचाननो दशभुजो विरूपाक्षो वृषध्वजः ।
घंटाशूलधरो धीरः पंचवक्त्रः प्रकथ्यते ॥ १ ॥पंचवक्त्रः॥
कल्हारः कमलासनास्त्रिनयनो व्याघ्रांबरो भीषणः
खट्वांगी वृषवाहनो जलरतिः कूष्मांडकांतिर्युवा ॥
कर्णे नागसुकुंडलो वररुचिः श्रीनीलकंठो विभुः
तंत्रीगानरतो विलासयुवतीकांतः सदामोदकः ॥२॥ कल्हारः
अतिस्निग्धोऽतिगौरश्च दिव्यगंधानुलेपनः ।
मृगपाणिर्जटाधारी योगी ललितसंज्ञकः॥ ३॥ ललितः ॥
कर्पूरांगो भीमकायो विधुमालोनिरीहकः । इति कुमाराः॥
त्रिलोचनो भस्मलेपश्चंद्रशेखरसंज्ञकः ॥ ४ ॥ चंद्रशेखरः ॥

अथ भैरवस्नुषाः ।

कुरंगमालिका चैव वीची मंगलकौशिकी ।
माहुलीति स्नुषा भांति भैरवस्य प्रकीर्तिताः ॥
कुरंगमालिकाध्याता यदि गीता कुरंगभे ।
कुरंगान्मोहयत्याशु मदनाकुलमानसा ॥१॥ कुरंगमालिका ॥
चंचलांगी सुनयना नीलोत्पलतनुः कृशा ।
रागिणी वीचिका ज्ञेया पद्मकुड्मलकस्तनी ॥ २ ॥ वीची ॥
सर्वमंगलसौभाग्या मधुरध्वनिरुत्तमा ।
कर्पूरामोदनिश्वासा सर्वावयवसुंदरी ॥३॥ मंगलकौशिकी ॥



माहुली शंखहस्ता च नखकेशसुशोभना ।
दाडिमोष्ठी ह्रस्वकुचा कंबुकंठी सुशोभना॥ ४ ॥ माहुली ॥

५ अथ कौशिकः । ध्यानम् ।

आरक्तवर्णो धृतगौरयष्टि-
र्वीरः सुवीरेषु कृतप्रवीरः ॥
वीरैर्वृतो वैरिकपालमालो
माली मतो कौशिकरागराजः ॥

अथ कौशिकांगनाः ।

तोडी च देवगांधारी देशाख्या च गुणक्रिया ।
शुद्धसावेरिकेत्येताः कौशिकस्य वरांगनाः ॥
तुषारकुंदोज्वलदेहयष्टिः
काश्मीरकर्पूरविलिप्तदेहा ॥
विनोदयंती हरिणं वनांते
वीणाधरा राजति तोडिकेयम्॥ १ ॥ तोडी ॥
निंबप्रसूनगुच्छाढ्या नीलरत्नविभूषणा ।
धीरात्मा देवगांधारी कौशिकस्य वरांगना ॥२॥ देवगांधारी ॥
देशाख्या तरुणी श्यामा मालतीकुसुमप्रिया ।
सुस्तनी वेदिमध्यांगी स्मेरास्या कुंकुमांकिता ॥३॥देशाख्या॥
गोपजातिप्रिया साध्वी गोरोचनविलेपना ।
गूढचर्या गुणक्रिया कथिता कौशिकांगना ॥४॥गुणक्रिया ॥
शुद्धचित्ता शुद्धमतिः शुद्धांबरसमावृता ।
शुद्धसावेरिका दिव्या शुद्धमार्गप्रवर्तिका॥५॥ शुद्धसावेरिका॥

अथ कुमाराः ।

विद्युन्मालश्च कामोदः सारंगश्चैव मोदकः ।
कौशिकस्य सुता एते नारदेन प्रकीर्तिताः ॥

तटित्प्रभोऽतिदीर्घश्च सुवक्त्रो मांसकप्रियः ।
वज्रहस्तोऽतिदीप्तश्च विद्युन्माल इतीष्यते ॥१॥ विद्युन्मालः ॥
मत्तो मत्तालिसंसेव्यो मत्तवारणसंस्थितः ।
वारुणीपात्रहस्तोऽपि मोदको राग इष्यते ॥२ ॥ मोदकः ॥
पुष्पगुच्छप्रियो माध्वीरसपानकुतूहलः ।
मनोजगर्वजनकः सारंगो रागनायकः॥ ३ ॥ सारंगः ॥
कामोदो रमणीयवेषसुलभः क्रौंचप्रियो दीर्घपात् ।
दंडी विप्रनिभो विलोलनयनो विद्याधराणां प्रियः ॥
पंचास्यो विधुसंनिभो ललितवाग्भस्मप्रियो राजसो
वेदाभ्यासरतो महामतिधरो रागः सदा पातु वः॥४॥कामोदः।

अथ कौशिकस्नुषाः ।

नटातरंगिणी पूर्णचंद्रिका पालिकापि च ।
जयंतसेनीत्येताः स्युः कौशिकस्य स्नुषाः स्मृताः ॥
नादानुवर्तिनी मीनलोचना हंसगामिनी ।
नटातरंगिणी नाम नालीकवदना मता ॥१॥नटातरंगिणी ॥
चकोरहृदयानंदसंधानचतुरा शुभा ।
पुरुषेण युता रम्या पुष्पांगी पूर्णचंद्रिका ॥२॥पूर्णचंद्रिका ॥
चूलिकालंकृतांभोजा केलिकाहंसगामिनी ।
तूलिकाशयने सक्ता पालिका नारदोदिता ॥ ३॥ पालिका ॥
जयंतसंमदकरी जलजातदलेक्षणा ।
जयंतसेनी विख्याता जमदग्निकुमारिका ॥४॥ जयंतसेनी॥

६ अथ मेघरागः ध्यानम् ।

कदंबवृक्षस्थितदिव्यमूर्ति-
र्मयूरवाहः करवीरपात्रः ॥
हरितवस्त्रो बहुनीलवर्णः
स मेघरागः कथितो मुनींद्रैः ॥



अथ मेघभार्याः ।

त्रोटकी मोटकी चैव अपरा च बृहन्नटा ।
अहंनटेति पंचैता मेघरागस्य योषितः ॥
विचित्रवस्त्रा वरकाय × ×
सुकंकणा कांचिनितंबिनी च ॥
उरोजवृत्ते धृतपाणिवीणा
संगीतलुब्धा प्रथमा वधू सा ॥ १ ॥ त्रोटकी ॥
मोटकी जलकुंभाढ्या चंद्रमंडलसंनिभा ।
शांता दिव्यांबरा धीरा द्विभुजा स्तनमंडला ॥२॥मोटकी ॥
अपरा वनिता गौरा गांधर्वा गीतकोविदा ।
चतुर्भुजा कोमलांगी दिव्यवस्त्रावृतस्तनी ॥ ३ ॥ अपरा ॥
बृहन्नटा नाटकयुक्तिसारा
हंसानना पुस्तकधारिणी सा ॥
धनस्तनी श्वेतसुपुष्पयुक्ता
पयोधसा (?) भुक्तवती सुमध्यमा ॥४॥ बृहन्नटा॥
अहंनटा नाटरूपा कंचुकाच्छादितस्तनी ।
नृत्यसंगीतकुशला कोकिलारवगायिनी ॥ ५ ॥अहंनटा ॥

अथ मेघकुमाराः ।

घंटकंठश्च कमलः श्रीघंटारवरोहकौ ।
मेघरागस्य तनयाः नारदेनप्रकीर्तिताः ॥
नीरदाभश्चतुर्हस्तो धृतकुंभसरोरुहः ।
कमनीयवपुः शांतो घंटकंठः प्रचक्ष्यते ॥ १ ॥ घंटकंठः ॥
कमलः कमलाहारः कमलांगद्युतिः पुमान् ।
कांतानुरंजकः कांतः कह्लारकुसुमप्रियः ॥ २ ॥ कमलः ॥
श्रीघंटारवरागोऽयं चित्तजातसमाकृतिः ।
अश्ववाहः खड्गपाणिः पीतवस्त्रः प्रजागरः ॥३॥ श्रीघंटारवः॥
गौरो गगनगामी च रोहकश्च सुगीयते ॥ ४ ॥ रोहकः ॥

अथ तेषां भार्याः ।

सुधामयी च डोंबक्री मृतसंजीवनी तथा ।
मेघरंजीति मेघस्य स्नुषा मुनिमतेरिताः ॥
सुधामयी सुधाकारा सुधापानरता शुभा ।
सुधाकरसहचरा रागिण्यमृतवर्षिणी ॥ १ ॥ सुधामयी ॥
डोंबी कृष्णा महादीर्घा आम्रनेत्रा घटस्तनी ।
काकस्वरा स्वराक्रांता मद्यपानपरायणा ॥ २ ॥ डोंबक्री ॥
अमृतानंदसंतुष्टा मृतसंजीवनी मता ।
चतुर्भुजावृत्तकुचा देवानां प्रीतिवर्धनी ॥ ३ ॥ मृतसंजीवनी ॥
सुनाभिः शुभवस्त्रा स्यान्मेघध्वनिस्तडित्प्रभा ।
स्मेरास्या कामचेष्टाढ्या भुजपल्लवमंडिता ॥ ४ मेघध्वनिः ॥

७. अथ नटनारायणः ध्यानम् ।

चतुर्भुजः प्रावृतपीतवस्त्रः
कंठे तु दीर्घा शुभपुष्पमाला ।
श्यामं वपुः सुंदरतार्क्ष्यवाहः
नारायणोऽयं नटशब्दपूर्वः ॥

अथ नटनारायणस्त्रियः ।

बंगाली शुद्धसालंका कांभोजी मधुमाधवी ।
देवक्रीति च पंचैता नटनारायणांगनाः ॥
कृष्णा कृष्णांबरा धीरा प्रगल्भा रतिलालसा ।
महास्तनी तंत्रिहस्ता बंगाली कैरवप्रिया ॥ १ ॥ बंगाली ॥
शुद्धांबरा शुद्धवपुः सुवेषा
सुवेणिका तालघनस्तनारतिः ।
चतुर्भुजा चंदनचर्चितांगी
सा शुद्धसालंकवधू प्रसन्ना ॥ २ ॥ शुद्धसालंका ॥
कांभोजा चंद्रवदना नीलोत्पलविभूषणा ।
रमणीयस्तनांभोजा बाणपुष्पावतंसिनी ॥ ३ ॥ कांभोजी ॥



मधुमाधविका रम्या माधवी कुसुमप्रिया ।
वसंतवनमध्यस्था पीतोन्नतपयोधरा ॥ ४ ॥ मधुमाधवी ॥
देवक्री दधिपाणिपात्रयुगला ग्रैवेयभूषोज्वला ।
स्तब्धोरोजसरोजकामचपला सा स्त्रीः परासुंदरी ॥
कौसुंभांबरधारिणी विधुमुखी श्रीखंडचर्चस्तनी ।
काश्मीरारुणविग्रहा सुनयना बिंबोष्ठिका राजते ॥ ५ ॥ देवक्री ॥

अथ कुमाराः ।

शुद्धबंगालको नाटो गारुडो मोहनस्तथा ।
नालीकनयना एते नटनारायणात्मजाः ॥
बाललीलातनुर्बालः सुवस्त्रेण सुशोभनः ।
बालिकाक्रीडनासक्तो बंगालः शुद्धसंज्ञकः ॥ १ ॥ शुद्धबंगालः ॥
अनेकनटधारी च युवा गौरोऽतिशोभनः ।
तांबूलहस्तः स्मेरास्यो नाटः सुरसिकैर्मतः ॥ २ ॥ नाटः ॥
गारुडो गरुडाकारो धृतसर्पो विलोलकः ।
रक्तनेत्रः पीतवस्त्रः सर्वाभरणभूषितः ॥ ३ ॥ गारुडः ॥
सुंदरो लोहितांगश्च तरुणो रूपवांस्तथा ।
स्त्रीजितो मदनाकारो मोहनः संनिगद्यते ॥ ४ ॥ मोहनः ॥

अथ तेषां भार्याः ।

त्रैलिंगी लांगली चैव सुरटा चापि हंबरी ।
इमाः सुवेषा राजंति नटनारायणस्नुषाः ॥
स्निग्धाभ्यंगवती गौरी मणिदंतविलासिनी ।
कुंकुमार्द्रा मुक्तकेशी त्रैलिंगी नृपवल्लभा ॥ १ ॥ त्रैलिंगी ॥
कृष्णा रक्तांबरा स्थूला गुंजाहारविभूषणा ।
स्थूलोरोजा रोमशा च लांगली गृध्रजप्रिया ॥ २ ॥ लांगली ॥
सूरटा लंपटा नारी कर्बुरांगी रतिप्रिया ।
नृत्यंती च हसंती च गायंती पद्मधारिणी ॥ ३ ॥ सुरटा ॥
हरितांगी हरिद्वस्त्रा मणिकुंडलभूषणा ।
पीनोरस्का गुच्छधारी हंबरी सुकरप्रिया ॥ ४ ॥ हंबरी ॥

८. अथ हिंदोलः । ध्यानम्।

निर्तबिनीवृंदतरंगितासु
दोलासु खेलासुखमादधानः ॥
खर्वः कपोतद्युतिकामयुक्तो
हिंदोलरागः कथितो मुनींद्रैः ॥

तस्य भार्याः ।

देशी शिवक्री ललिता मल्हारी च सुहंसिका ।
एताः पंच प्रिया भांति हिंदोलस्य मुनेर्मते ॥
वीरे रसे व्यंजितरोमहर्षा
निरुध्य संबद्धविलासबाहुः ॥
प्रांशुप्रचंडा किल सुंदरांगी
हिंदोलकांता किल भाति देशी ॥ १ ॥ देशी ॥
कैलासवासप्रियनादरूपा
लीलायुता × × ॥
दृश्या समस्तैरपि सेव्यमाना
च क्रीडिता भातितरां शिवक्री ॥२॥ शिवक्री ॥
प्रफुल्लसतच्छदमाल्ययुक्ता
गौरी कृशांगी तरुणी चलाक्षी ॥
विनिश्वसच्छ्वासवशात् प्रभाते
विलासवेषा ललिता प्रदिष्टा ॥ ३ ॥ ललिता ॥
प्रेमास्पदा पीतकुसुंभवर्णा
धर्मस्वरूपा तरुणी सुवेषा ॥
कह्लारकैश्या कमलायताक्षी ।
मल्लारिनाम्नी मधुरस्वरेयम् ॥४॥ मल्लारी ॥
सुहंसिका रक्तपादा रक्तपुष्पावतंसिनी ।
रक्तदंडधरा रक्ता तप्तकांचनभूषणा ॥ ५ ॥ सुहंसिका ॥



अथ हिंदोलकुमाराः ।

रमणीयो मुखारिश्चोदयपंचम एव च ।
पुनः शुद्धवसंतश्च हिंदोलस्य सुताः स्मृताः ॥
कोमलांगो नीलवस्त्रः पीतमाली सुरूपवान् ।
सर्वरागेषु सुरसो रमणीयः प्रचक्ष्यते ॥१॥ रमणीयः ॥
पद्मोपमानवदनः पारिजातसुमांकितः।
सुखावहस्वरो भाति मुखारिर्मुनिवर्णितः ॥ २ ॥ मुखारिः ॥
नवाम्रपल्लवाहारो नराणामतिवल्लभः ।
वीणामृदुस्वरो भातितरामुदयपंचमः ॥ ३ ॥ उदयपंचमः ॥
कोकिलस्वरसंपन्नः कोमलः कोरकप्रियः ।
शुभः शुद्धवसंतोऽयं विराजति मुनेर्मते ॥ ४॥ शुद्धवसंतः ॥

अथ तेषां भार्याः ।

सिंधुरामक्रिया वेगवाहिनी च धराह्वया ।
छायातरंगिणी चैव हिंदोलस्य स्नुषाः स्मृताः ॥
स्वरकल्लोलललिता कांतास्येंदुसमुत्सुका ।
सिंधुवारदला भांगी सिंधुरामक्रिया मता॥१॥ सिंधुरामक्रिया॥
चक्रवाकस्तनी शांता चलाचलमणीसरा ।
वर्णिता मुनिना वेगवाहिनी जनमोहिनी ॥२॥ वेगवाहिनी॥
सुंदरा धरणी प्रोक्ता स्थिरा कुंभकरा वरा ।
पृथूरोजा गुहानाभिर्वरारोहा विशालदृक् ॥ ३ ॥ धरणी ॥
यमुनाभघनाकारा यायजूकप्रियस्वरा ।
गेया ध्येया मुनिजनैः सेयं छायातरंगिणी॥४॥ छायातरंगिणी॥

९. अथ दीपकः । ध्यानम् ।

बालारतार्थं प्रविलीनदीपे
गृहेऽन्धकारे सुभगी प्रवृत्तः ॥
तस्याः शिरोभूषणरत्नदीपै-
र्लज्जां ससज्जां कृतवान् प्रदीपः ॥

थ तस्य भार्याः ।

असावेरी नाटिका च देहली कानडा तथा ।
केदारीति स्त्रियः पंच दीपकस्य यथाक्रमम् ॥
कुंकुमांकितवक्षोजा पुरुषेण समास्थिता ।
संगीतरसिका राजत्यसावेरी मुनेर्मते ॥ १ ॥ असावेरी ॥
जपाकुसुमसंकाशा निचोलं पीतवाससम् ।
वहंती वपुषा तन्वी नाटिका रक्तकंचुकी ॥ २ ॥ नाटिका ॥

देहली कनककांतिसुंदरा
रत्नहारकुचकोरकाऽधरा ॥
वल्लकीकरसरोरुहा शुभा
भाविनी नटवरा विराजते ॥ ३ ॥ देहली ॥

कर्नाटी कमलेक्षणा सुरतरोर्मूले वसंती मुहुः
श्वासोच्छ्वासविभिन्नमोदमभितः संपूरयंती दिशः ॥
कीरं नीलनिचोलजुष्टमभितः स्वर्णाभया बिभ्रती
कांतारे पिककूजिते स्वदयितं साकेतके पश्यति ॥ ४ ॥ कर्नाटी ॥

विरहविबुधचित्ता पांडुगंडा कृशांगी
मलयजरसपूरैः सिच्यमाना सखीभिः ॥
सरसकमलपत्रैः क्लृप्तशय्यानिविष्टा
हिमकराशितिवस्त्रा भाति केदारिकेयम् ॥५॥केदारी॥

अथ दीपककुमाराः ।

केदारगौळो वैरंजी होलः सौराष्ट्र एव च ।
दीपकाख्यस्य रागस्य चत्वारस्तनयाः स्मृताः ॥
कौशेयकंचुकोष्णीषकर्णभूषोज्वलाकृतिः ।
केदारगौळः सर्वेषां मोदावहमृदुस्वरः ॥ १ ॥ केदारगौळः ॥
आनायवसनं धृत्वा नानाकुसुमशेखरः ।
वैरंजी विबुधस्तुल्यो विलेपितमृगीमदः ॥ २ ॥ वैरंजी ॥



दाडिमीकुसुमासक्तः कालिमाकलिताकृतिः
होलिरागः समाभाति हेलिकोटिसमद्युतिः ॥ ३ ॥ होलः ॥
सकलामोदसंधाता सुवर्णोष्णीषमंडितः ।
करांचितक्षीरपात्रः सौराष्ट्रो रागनायकः ॥४॥ सौराष्ट्रः ॥

अथ दीपकस्नुषाः ।

कुरंजमंजरी नागवराली देवरंजनी ।
सुरसिंधुरिति ख्याता दीपकस्य स्नुषाः स्मृताः ॥
कुरंजमंजरी भाति कुटिलालकजालका ।
कुरंटकुसुमासक्ता कोविदारवने स्थिता ॥ १ ॥ कुरंजमंजरी ॥
नागयाना नागवेणी नगोपमकुचद्वया ।
अरालकुरला नागवराली वरवर्णिनी ॥ २ ॥ नागवराली ॥
कदलीवनसंवासा वीणावादनतत्परा ।
मृगीमदविलिप्तांगी विख्याता देवरंजनी ॥ ३ ॥ देवरंजनी ॥
कल्पद्रुवनमध्यस्था कनकांबुजगंधिला ।
रसस्वरूपिणी भाति सुरसिंधुः शुभान्विता ॥ ४ ॥ सुरसिंधुः ॥

१०. अथ हंसकरागः । ध्यानम् ।

कासारकेलिरसिकः कमलोत्संगवर्तनः ।
कीर्तिमान् हंसको नाम रागराजो विराजते ॥

अथ तस्य भार्याः ।

श्रीरंजनी च मालश्रीः सरस्वतिमनोहरी ।
गौरी चेशमनोहारी पंचैता हंसकस्त्रियः ॥
नवाब्जकोशसदृशा स्तनभारनताकृतिः ।
श्रीरंजनी नाथयुता शिखिपिच्छकरोज्ज्वला ॥ १ ॥श्रीरंजनी॥
मंजीरांचितपादाब्जा मधुराहारवल्लभा ।
माध्वी मृदुवचा भाति मालश्रीर्मधुरस्वरा ॥ २ ॥ मालश्रीः॥
विपंचीवादनासक्ता विशदांबरधारिणी ।
चक्रांगगमना भाति सरस्वतिमनोहरी ॥ ३ ॥ सरस्वतिमनोहरी ॥
धाराधरनिभाकारा धीरा गंभीरनिस्वना ।
गौरी जनमनोहारी गरकंठप्रियस्वरा ॥ ४ ॥ गौरी ॥

कदंबतरुमूलस्था कर्पूररसलेपना ।
राजतीशमनोहारी रमणीयमृदुस्वरा ॥ ५ ॥ ईशमनोहारी ॥

अथ हंसककुमाराः ।

नागध्वनिश्च सामंतो भिन्नपंचमटक्किकौ ।
हंसकस्य सुता एते चत्वारो नारदोदिताः ॥
नारंगवनसंवासी नराणामतिवल्लभः ।
नवनीतसमालापो नागध्वनिरितीर्यते ॥ १ ॥ नागध्वनिः ॥
धीमंतो यं सदा स्तुत्वा श्रीमंतो भांति भूतले ।
हेमंतकाले सरसः सामंतः स उदाहृतः ॥ २ ॥ सामंतः ॥
सहकारवने स्थित्वा सरसस्वरमंजुलः ।
सदा गायति वीणांकः सरसं भिन्नपंचमः ॥ ३ ॥ भिन्नपंचमः ॥
ढक्कानादप्रियः स्वामी दिक्का (?) यशसा स्फुरन् ।
टक्को नाम विभात्येष रागराजो रतिप्रियः ॥ ४ ॥ टक्कः ॥

अथ तेषां भार्याः ।

मालवी श्यामकल्याणी देशाक्षी च बिलाहरी ।
हंसकस्य स्नुषा भांति सर्वलक्षणलक्षिताः ॥
कालांबुदनिभाकारा कर्पूरकदलीवने ।
वसंती मालवी भाति वीणागानसमुत्सुका ॥ १ ॥ मालवी ॥
सरत्नहेमाभरणा सगंधकुसुमारुणा ।
साध्वी सा श्यामकल्याणी माध्वी मधुरभाषिणी॥२॥श्यामकल्याणी।
अरुणोदयवेलायामनुरक्ता पतौ सदा ।
देशाक्षी नाम विख्याता दिव्यगंधानुलेपना ॥ ३ ॥ देशाक्षी ॥
कलापशालिनी बर्हिकलापकृतवेणिका ।
बिलाहारी कलालापा बलाहकनिभाकृतिः ॥४॥ बिलाहरी॥

इति श्रीनारदीये चत्वांरिंशच्छतरागनिरूपणं संपूर्णम् ॥

इति शुभम् ।

## जाहिरात.

### संगीतोपयोगी ग्रंथमालिका.

| | | | | |
|---|---|---|---|---|
| १ | श्रीमल्लक्ष्यसंगीतम् | ( संस्कृत ) | ... ... | ०-१० |
| २ | श्रीमद्रागकल्पद्रुमांकुरः | ( ,, ) | ... ... | ०—३ |
| ३ | रागचंद्रिका | ( ,, ) | ... ... | ०—३ |
| ४ | अष्टोत्तरशतताललक्षणम् | ( ,, ) | ... ... | ०—२ |
| ५ | संगीतसारामृतोद्धारः | ( ,, ) | ... ... | ०—४ |
| ६ | सद्रागचंद्रोदयः | ( ,, ) | ... ... | ०—४ |
| ७ | अभिनवतालमंजरी | ( ,, ) | ... ... | ०—२ |
| ८ | रागलक्षणम् | ( ,, ) | ... ... | ०—६ |
| ९ | चत्वारिंशच्छतरागनिरूपणम् | (,,) | ... ... | ०—२ |
| १० | रागमाला | ( ,, ) | ... ... | ०—४ |
| ११ | संगीतसुधाकरः | ( ,, ) | ... ... | ०—८ |
| १२ | हृदयकौतुकम् } हृदयप्रकाशः | ( ,, ) ( ,, ) | ... ... | ०—८ |
| १३ | रागतरंगिणी } रागतत्वबोध रागमंजरी | ( ,, ) | ... ... | ०—८ |
| १४ | चतुर्दंडिप्रकाशिकासारः | ( ,, ) | ... ... | |
| १५ | स्वरमालिका भाग १ ला | ( टाइप गुजराथी ) | ... | ०—८ |
| १६ | गीतमालिका | ( हिंदी भाग १ ते १३ ) प्रत्येक भाग | | ०—४ |
| १७ | हिंदुस्थानी संगीत पद्धति | (भाग १ मराठींत) | ... | १—४ |
| १८ | ,, ,, ,, | ( ,, २ ,, ) | ... | २—० |
| १९ | ,, ,, ,, | ( ,, ३ ,, ) | ... | २—० |
| २० | हिंदुस्थानी संगीत पद्धति | ( भाग १ गुजराथींत ) | | १—८ |
| २१ | नादोदधि | ( हिंदी ) | छापत आहे. | |
| २२ | सुगमरागमाला | ( ,, ) | ... ... | ०—४ |
| २३ | संगीत रत्नाकरः | (गुजराथी भाषांतरासह २ अध्याय) | | ०—८ |
| २४ | संगीतदर्पणम् | ( ,, ,, २ ,, ) | | ०—८ |
| २५ | स्वरमेलकलानिधिः | ( मराठी भाषांतरासह ) | | ०—३ |
| २६ | पारिजातप्रवेशिका | ( मराठी ) | ... ... | ०—५ |
| २७ | रागविबोधप्रवेशिका | ( ,, ) | ... ... | ०—६ |
| २८ | स्वरमालिका | भाग १ ला | ... ... | ०-१२ |

पत्रव्यवहार खालील पत्त्यावर करावा.

पत्ताः—भालचंद्र सीताराम सुकथनकर, एम्. ए., एल्एल्. बी.,
सॉलिसिटर, २२ कार्न्याक रोड, मुंबई.